# S-III/5/1224A/22

## पञ्चमसत्रार्द्धम्

## पञ्चमपत्रम्

## साहित्यम्

पूर्णाङ्का: 80

समय: घण्टात्रयम्

(15×2=30)

अ. **अतिलघूत्तरीया: सर्वे प्रश्ना: समाधेया:।**

1. महावाक्यलक्षणं विलिख्य एकम् उदाहरणं लिखत।
2. पदलक्षणं लिखत।

**अथवा**

अर्थ: कतिविध:? के ते?

3. व्यवहारादेव प्रथमं सङ्केतग्रह इति केषां मतम्?
4. सङ्केत: कुत्र कुत्र गृह्यते?

**अथवा**

शव्दस्य अर्पिता शक्ति: का? अर्पिता इति पदस्य क: अर्थ:?

5. व्युत्पत्तिलभ्यार्थस्य गौरित्यादौ मुख्यार्थत्वे का हानि:?
6. अभिधा कमर्थं वोधयति?
7. सारोपाया: लक्षणाया: लक्षणं किम्?

**अथवा**

अभिधाद्यासु विरतासु अर्थान्तरं कया वृत्त्या वोध्यते?

8. केषां विरम्य व्यापारो नास्ति?
9. तुरीया वृत्ति: किमर्थम् अङ्गीकार्या?

11. यत्पर: शव्द: स शव्दार्थ: - इति वाक्यस्य किं तात्पर्यम्?

11. अभिहितान्वयवादिभि: अङ्गीकृता वृत्ति: का? सा कुत्र परिक्षीणा भवति?

**अथवा**

कस्मात् अभिधेयत: भिन्न: व्यङ्ग्य:।

12. रसादौ लक्षणा कुतो न प्रवर्त्तते ?

13. श्रुतान्वयादनाकांक्षम् इत्यादिवाक्यं कस्य ? कस्मिन् ग्रन्थे वर्त्तते ?

14. रसादिरनुमेय इति कस्य मतम् ?

**अथवा**

जलकेलीत्यादिपद्ये कः अलङ्कारः ध्वन्यते ?

15. भीरोरपि गोदानदीतीरे कस्मात् कस्मात् भ्रमणं भवेत् ?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** (5×6=30)

16. वाक्यलक्षणं सदलप्रयोजनं प्रतिपादयत।

17. व्यवहारात्कथं सङ्केतग्रह इति विशदयत।

**अथवा**

श्वेतः अश्वः धावति इत्यत्र का लक्षणा ? प्रतिपादयत।

18. उपादानलक्षणां सोदाहरणं विशदयत।

19. यथेच्छं संयोगादिषु पञ्च सोदाहरणं विशदयत।

**अथवा**

"श्रुतान्वयादनाकांक्षं न वाक्यं ह्यन्यदिच्छत पदार्थान्वयवैधुर्यात् तदाक्षिप्तेन" सङ्गतिं व्याख्यात।

20. भ्रम धार्मिकेत्यादिपद्ये हेत्वाभासं स्पष्टयत।

**अथवा**

प्रागसत्त्वाद्रसादेर्नो बोधिके लक्षणाभिधे।

किञ्च मुख्यार्थबाधस्य विरहादपि लक्षणा।

**स. द्वौ प्रश्नौ समाधेयौ।** (2×10=20)

21. व्यञ्जनां सोदाहरणं निरूपयत।

**अथवा**

लक्षणास्वरूपं स्पष्टयत।

22. उपादानलक्षणलक्षणयोः भेदं विशदयत।

**अथवा**

सारोपासाध्यवसानयोः भेदं स्पष्टयत।